# संस्कृत वार्ता:

**दिनाङ्क** :- 15.10.2026 **प्रात:** - 06:55

**अथवार्ताः**

**प्रधानमन्त्री - लद्दाखे विकासपरियोजनाः**

प्रधानमन्त्री नरेन्द्रमोदी अद्य दृश्यश्रव्य-परान्तर्जालीय-माध्यमेन लद्दाखे प्रायः पञ्चाशदधिक- त्रिशताधिक – त्रिसहस्रकोटि -रूप्यकाणां पञ्च प्रमुखविकासपरियोजनानाम् उद्घाटनं करिष्यति तथा ताः राष्ट्राय समर्पयिष्यति। एतासां परियोजनानां उद्देश्यं सम्पर्कव्यवस्थायाः सुदृढीकरणम्, ऊर्जासम्बद्ध-आधारसंरचनायाः परिष्करणं, सांस्कृतिकवैभवस्य संरक्षणम् तथा क्षेत्रे जलसुरक्षायाः संवर्धनं च अस्ति। अस्मिन्नवसरे प्रधानमन्त्री जनसभाम् अपि सम्बोधयिष्यति।

**प्रधानमन्त्री - एशियाक्रीडाः**

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्याम् अस्मिन् वर्षे आयोजितासु एशियाक्रीडासु भागं गृहीतवतः भारतीयक्रीडकदलस्य सदस्यैः सह संवादं करिष्यति। अस्मिन्नवसरे प्रधानमन्त्री उपस्थितजनसमूहमपि सम्बोधयिष्यति। जापानदेशस्य आइची-नागोया-नगरे आयोजितासु एशियाक्रीडासु भारतं पदकतालिकायां चतुर्थं स्थानं प्राप्तवत्। भारतेन आहत्य पञ्चाशीति-पदकानि प्राप्तानि, येषु एकविंशति-स्वर्णपदकानि, सप्तविंशति-रजतपदकानि तथा सप्तत्रिंशत्-कांस्यपदकानि च सम्मिलितानि सन्ति।

**प्रोमो - सोशल मीडिया**

**केन्द्रीयमन्त्रिमण्डलम्**

प्रधानमन्त्रिणः नरेन्द्रमोदिनः अध्यक्षतायां केन्द्रीयमन्त्रिमण्डलेन चत्वारिंशत्सहस्राधिक- एकादशलक्षाधिकेभ्यः रेलकर्मचारिभ्यः अष्टसप्ततिदिवसानां वेतनसमतुल्यम् पीएलबी इति उत्पादकतासम्बद्ध-प्रोत्साहनधनम् अनुमोदितम्। मन्त्रिमण्डलस्य उपवेशनानन्तरं सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः वार्ताहरान् संसूचितवान् यत् अस्य धनस्य वितरणाय प्रशासनेन नवधिक-द्विसहस्रकोटिरूप्यकेभ्यः अधिका राशिः आवण्टिता अस्ति। केन्द्रीयमन्त्रिमण्डलेन अस्माद् वर्षादारभ्य पञ्चवर्षपर्यन्तं राष्ट्रियसामाजिकसहायताकार्यक्रमस्य निरन्तरतायै अनुमोदनं प्रदत्तम्। अस्य कार्यक्रमस्य कृते अष्टाविंशत्यधिक-चतुःशताधिक-त्रिपञ्चाशत्सहस्रकोटिरूप्यकाणां व्ययः निर्धारितः अस्ति। अस्य राष्ट्रियसामाजिक-सहायताकार्यक्रमस्य नाम परिवर्त्य प्रधानमन्त्री सामाजिकसहायतायोजना इति कृतम् अस्ति। श्रीवैष्णवः दिव्याङ्ग-पेंशन-योजना इत्येताम् आलक्ष्य अवदत् यत् -

**महिला-कृषक-दिवसः**

कृषि-कृषककल्याण-विभागः अद्य नवदिल्ल्याम् अस्य वर्षस्य महिला-कृषक-दिवसस्य राष्ट्रियस्तरीयम् आयोजनं करिष्यति। अस्य आयोजनस्य उद्देश्यम् भारतीयकृषिक्षेत्रे महिलानां योगदानस्य सम्मानः अस्ति। कृषि-कृषककल्याण-मन्त्रालयेन उक्तं यत् महिलाः भारतस्य कृषिव्यवस्थायाः अभिन्नाङ्गानि सन्ति। ताः बीजवपनं, रोपणं, सस्यकर्तनं च समेत्य पशुपालनम्, बीजरक्षणम्, प्राकृतिकसंसाधनानां प्रबन्धनं च यावत् अनेकासु महत्त्वपूर्णासु भूमिकासु योगदानं कुर्वन्ति।

**दिल्लीप्रशासनम्**

दिल्लीप्रशासनेन डी बीटी इति प्रत्यक्षलाभान्तरणमाध्यमेन दिल्लीनगरनिगम-विद्यालयानां विद्यार्थिभ्यः सप्तत्यधिक-त्रयोदश-शतरूप्यकाणाम् आर्थिकसहायतां प्रदातुं घोषणा कृता। अस्मिन् विषये दिल्ल्याः मुख्यमन्त्री रेखागुप्ता अवदत् यत् ह्यः प्रत्यक्षलाभान्तरणमाध्यमेन पञ्चलक्षाधिकानां नगरनिगमविद्यालयीयविद्यार्थिनां वस्त्राणां विद्यालयीयस्यूतानां च क्रयणाय सप्ततिकोटितोप्यधिकानि रूप्यकाणि विमोचितानि।

**ऋतुविभागः**

भारतर्तुविज्ञानविभागेन अद्य हरियाणा-चण्डीगढ-पञ्जाब-दिल्ली-केरलम-माहे-तमिलनाडु-पुडुचेरी चेत्येतेषु स्थलेषु अतिवृष्टेः सम्भावनां दृष्ट्वा नारङ्गवर्णपरा सञ्चेतना प्रकाशिता। तदतिरिक्तं तटीय-आन्ध्रप्रदेशे तथा दक्षिणान्तर्वर्ती-कर्नाटके च अद्य अतिवृष्टेः सम्भावना पूर्वानुमानिता अस्ति।

**क्रिकेट्**

पुरुषक्रिकेट्-क्रीडायां ह्यः रात्रौ हैदराबादे आयोजितायां चतुर्थायां विंशति-प्रतिविंशति-अन्ताराष्ट्रियप्रतिस्पर्धायां वेस्टइण्डीज्-दलेन भारतं चतुर्विंशतिधावनाङ्कैः पराजितम्। अस्यां पञ्चस्पर्धात्मिकायां शृङ्खलायां सम्प्रति उभे दले द्वि द्वि इति समस्थितौ स्तः। शृङ्खलायाः अन्तिमा स्पर्धा अस्य मासस्य सप्तदश-दिनाङ्के बेङ्गलूरुनगरस्य एम्. चिन्नास्वामी-क्रीडाङ्गणे आयोजयिष्यते।

॥ **इति वार्ताः**॥